# मन्त्रपुष्पम्

# *mantra puṣpam*

यो॑ऽपां पुष्पं॒ वेद॑ । पुष्प॑वान् प्र॒जावा᳚न् पशु॒मान् भ॑वति ।

*yȯ'pāṁ puṣpa̱ṁ vedȧ | puṣpȧvān pra̱jāvā̎n paśu̱mān bhȧvati |*

च॒न्द्रमा॒ वा अ॒पां पुष्प᳚म् । पुष्प॑वान् प्र॒जावा᳚न् पशु॒मान् भ॑वति ।

*ca̱ndramā̱ vā a̱pāṁ puṣpa̎m | puṣpȧvān pra̱jāvā̎n paśu̱mān bhȧvati |*

य ए॒वं वेद॑ । यो॑ऽपामा॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति ॥१॥

*ya e̱vaṁ vedȧ | yȯ'pāmā̱yatȧna̱ṁ vedȧ | ā̱yatȧnavān bhavati ||1||*

अ॒ग्निर्वा अ॒पामा॒यत॑नम् । आ॒यत॑नवान् भवति ।

*a̱gnirvā a̱pāmā̱yatȧnam | ā̱yatȧnavān bhavati |*

यो᳚ऽग्नेरा॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति ।

*yo̎'gnerā̱yatȧna̱ṁ vedȧ | ā̱yatȧnavān bhavati |*

आपो॒ वा अ॒ग्नेरा॒यत॑नम् । आ॒यत॑नवान् भवति ।

*āpo̱ vā a̱gnerā̱yatȧnam | ā̱yatȧnavān bhavati |*

य ए॒वं वेद॑ । यो॑ऽपामा॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति ॥२॥

*ya e̱vaṁ vedȧ | yȯ'pāmā̱yatȧna̱ṁ vedȧ | ā̱yatȧnavān bhavati ||2||*

वा॒युर्वा अ॒पामा॒यत॑नम् । आ॒यत॑नवान् भवति ।

*vā̱yurvā a̱pāmā̱yatȧnam | ā̱yatȧnavān bhavati |*

यो वा॒योरा॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति ।

*yo vā̱yorā̱yatȧna̱ṁ vedȧ | ā̱yatȧnavān bhavati |*

आपो॒ वै वा॒योरा॒यत॑नम्। आ॒यत॑नवान् भवति।

*āpo̱ vai vā̱yorā̱yatȧnam | ā̱yatȧnavān bhavati |*

य ए॒वं वेद॑। यो॑ऽपामा॒यत॑नं॒ वेद॑। आ॒यत॑नवान् भवति ॥३॥

*ya e̱vaṁ vedȧ | yȯ'pāmā̱yatȧna̱ṁ vedȧ | ā̱yatȧnavān bhavati ||3||*

अ॒सौ वै तप॑न्न॒पामा॒यत॑नम्। आ॒यत॑नवान् भवति।

*a̱sau vai tapȧnna̱pāmā̱yatȧnam | ā̱yatȧnavān bhavati |*

यो॑ऽमु॒ष्य तप॑त आ॒यत॑नं॒ वेद॑। आ॒यत॑नवान् भवति।

*yȯ'muṣya̱ tapȧta ā̱yatȧna̱ṁ vedȧ | ā̱yatȧnavān bhavati |*

आपो॒ वा अ॒मुष्य॒ तप॑त आ॒यत॑नम्। आ॒यत॑नवान् भवति।

*āpo̱ vā a̱muṣya̱ tapȧta ā̱yatȧnam | ā̱yatȧnavān bhavati |*

य ए॒वं वेद॑। यो॑ऽपामा॒यत॑नं॒ वेद॑। आ॒यत॑नवान् भवति ॥४॥

*ya e̱vaṁ vedȧ | yȯ'pāmā̱yatȧna̱ṁ vedȧ | ā̱yatȧnavān bhavati ||4||*

च॒न्द्रमा॒ वा अ॒पामा॒यत॑नम्। आ॒यत॑नवान् भवति।

*ca̱ndramā̱ vā a̱pāmā̱yatȧnam | ā̱yatȧnavān bhavati |*

यश्च॒न्द्रम॑स आ॒यत॑नं॒ वेद॑। आ॒यत॑नवान् भवति।

*yaśca̱ndramȧsa ā̱yatȧna̱ṁ vedȧ | ā̱yatȧnavān bhavati |*

आपो॒ वै च॒न्द्रम॑स आ॒यत॑नम्। आ॒यत॑नवान् भवति।

*āpo̱ vai ca̱ndramȧsa ā̱yatȧnam | ā̱yatȧnavān bhavati |*

य ए॒वं वेद॑। यो॑ऽपामा॒यत॑नं॒ वेद॑। आ॒यत॑नवान् भवति ॥५॥

*ya e̱vaṁ vedȧ | yȯ'pāmā̱yatȧna̱ṁ vedȧ | ā̱yatȧnavān bhavati ||5||*

नक्षत्राणि वा अपामायतनम्। आयतनवान् भवति।

*nakṣa̍trāṇi̱ vā a̱pāmā̱yata̍nam | ā̱yata̍navān bhavati |*

यो नक्षत्राणामायतनं वेद्। आयतनवान् भवति।

*yo nakṣa̍trāṇāmā̱yata̍na̱ṁ veda̍ | ā̱yata̍navān bhavati |*

आपो वै नक्षत्राणामायतनम्। आयतनवान् भवति।

*āpo̱ vai nakṣa̍trāṇāmā̱yata̍nam | ā̱yata̍navān bhavati |*

य एवं वेद्। योऽपामायतनं वेद्। आयतनवान् भवति ॥६॥

*ya e̱vaṁ veda̍ | yo̍'pāmā̱yata̍na̱ṁ veda̍ | ā̱yata̍navān bhavati ||6||*

पर्जन्यो वा अपामायतनम्। आयतनवान् भवति।

*pa̱rjanyo̱ vā a̱pāmā̱yata̍nam | ā̱yata̍navān bhavati |*

यः पर्जन्यस्यायतनं वेद्। आयतनवान् भवति।

*yaḥ pa̱rjanya̍syā̱yata̍na̱ṁ veda̍ | ā̱yata̍navān bhavati |*

आपो वै पर्जन्यस्यायतनम्। आयतनवान् भवति।

*āpo̱ vai pa̱rjanya̍syā̱yata̍nam | ā̱yata̍navān bhavati |*

य एवं वेद्। योऽपामायतनं वेद्। आयतनवान् भवति ॥७॥

*ya e̱vaṁ veda̍ | yo̍'pāmā̱yata̍na̱ṁ veda̍ | ā̱yata̍navān bhavati ||7||*

संवत्सरो वा अपामायतनम्। आयतनवान् भवति।

*sa̱ṁva̱tsa̱ro vā a̱pāmā̱yata̍nam | ā̱yata̍navān bhavati |*

यस्संवत्सरस्यायतनं वेद्। आयतनवान् भवति।

*yassa̍ṁvatsa̱rasyā̱yata̍na̱ṁ veda̍ | ā̱yata̍navān bhavati |*

आपो वै संवत्सरस्यायतनम् । आयतनवान् भवति ।

*āpo vai saṁvatsarasyāyatanam | āyatanavān bhavati |*

य एवं वेद । योऽप्सु नावं प्रतिष्ठितां वेद । प्रत्येव तिष्ठति ॥८॥

*ya evaṁ veda | yo'psu nāvaṁ pratiṣṭhitāṁ veda | pratyeva tiṣṭhati ||8||*

राजाधिराजाय प्रसह्यसाहिने । नमो वयं वैश्रवणाय कुर्महे ।

*rājādhirājāya prasahyasāhine | namo vayaṁ vaiśravaṇāya kurmahe |*

स मे कामान्कामकामाय मह्यम् । कामेश्वरो वैश्रवणो ददातु ।

*sa me kāmānkāmakāmāya mahyam | kāmeśvaro vaiśravaṇo dadātu |*

कुबेराय वैश्रवणाय । महाराजाय नमः ॥९॥

*kuberāya vaiśravaṇāya | mahārājāya namaḥ ||9||*

ॐ शान्तिः शान्तिः शान्तिः ॥

*om śāntiḥ śāntiḥ śāntiḥ ||*